**दिनाङ्क:-10.12.2025**

**प्रात: - 06:55**

**अथ वार्ताः**

**प्रधानमन्त्रिणा- मैक्रोसाफ्ट्**

प्रधानमन्त्रिणा नरेन्द्रमोदिना एशिया-महाद्वीपे मैक्रोसाफ्ट्-संस्थायाः बृहत्तमस्य निवेशस्य स्वागतं कृतम् तथा च कृत्रिम-बुद्धिमत्तायाः क्षेत्रे भारतस्य नेतृत्वस्य विषये आशा प्रकटिता। मैक्रोसाफ्ट् इत्यस्य अध्यक्षस्य तथा सी. ई. ओ. सत्या-नडेला-इत्यनेन सामाजिकान्तर्जालीये पटले लिखितस्य लेखस्य प्रत्युत्तरे श्रीमोदिना उक्तं यत् यदा ए. आई. इत्यस्य विषये चर्चा भवति तदा भारतं प्रति विश्वं आशान्वितः अस्ति। सः अवदत् यत् भारतं मैक्रोसाफ्ट्-संस्थायाः बृहत्तमं निवेशस्थानं भवति एतत् दृष्ट्वा सः प्रसन्नः अस्ति। अत्रान्तरे, श्री-नडेला-वर्यः भारतस्य ए. आई. अवसरस्य विषये प्रेरक-चर्चायाः कृते श्रीमोदिनं धन्यवादं प्रदत्तवान्। सामाजिक-पटले श्रीनडेला अवदत् यत् मैक्रोसाफ्ट् भारतस्य महत्त्वाकांक्षां समर्थयितुं सप्तदश-अरब यू. एस्. डालर्- तोप्यधिकानां निवेशं करिष्यति।

**अमितशाहः-वन्देमातरम्**

केन्द्रीय-गृह-मन्त्री अमितशाहः अवदत् यत् संसदि वंदे मातरम् गीतस्य उपरि चर्चया भावी-संततयः तस्य वास्तविकं महत्त्वं वैभवं च अवगन्तुं समर्थाः भविष्यन्ति। सः अवदत् यत् राष्ट्रगीतं वंदे मातरम् देशभक्तेः, त्यागस्य, राष्ट्रिय-चेतनायाः च प्रतीक: अभवत्, येन स्वातन्त्र्य-आन्दोलनस्य मार्गः प्रशस्तः अभवत्। ह्य: राज्यसभायां वंदे मातरम् गीतस्य सार्धैकशततमे वार्षिकोत्सवे चर्चायाः आरम्भ: कुर्वन् श्रीशाहः अवदत् यत्, एषा अमरकृति भारतमातरं प्रति कर्तव्यस्य भक्तेः च भावं प्रज्वालयति। सः अवदत् यत्, स्वतन्त्रता-सङ्ग्रामस्य समये वंदे मातरम् आवश्यकम् आसीत्, अद्यत्वे अपि अस्ति, यदा देशः सप्तचत्वारिंशदधिक द्विसहस्रतमे वर्षे भारतं विकसितं भविष्यति। मन्त्रिणा उक्तं यत्, स्वातन्त्र्य-योद्धारः प्रत्येकस्य समागमस्य आरम्भः वंदे मातरम् गीतेन एव क्रियन्ते स्म, अद्य यदा वीरसैनिकाः सीमायां सर्वोच्च- बलिदानं कुर्वन्ति, तदा ते वंदे मातरम् एव गायन्ति।

**नायडु-इण्डिगो**

केन्द्रीय-नागरिक-उड्डयन-मन्त्रिणा श्री-राममोहन-नायडुना ह्य: प्रोक्तम् यत् इण्डिगो-संस्थायां सद्यः उत्पन्न-समाह्वानानां निवारणं शीघ्रमेव भविष्यति, अपि च सुदृढ-विमानयान-व्यवस्थायाः निर्माणे पुनरुद्धाटने च प्रशासनं पूर्णतया प्रतिबद्ध: अस्ति। लोकसभायां इण्डिगो-सङ्कट- विषये मन्त्री अवदत् यत् इण्डिगो-संस्था एव पूर्ण रूपेण दोषि अस्ति।

मन्त्रिणा निगदितम् यत् डी.जी.सी.ए. इत्यनेन विमान-संस्थाम् प्रति निर्देशाः प्रदत्ताः, यत् तस्य प्रतिवेदनस्य आधारेण एव कठोराचरणं भविष्यति। श्री-नायडुः अवदत् यत् यावत् स्थितिः सामान्यतां न प्राप्नोति तावत् प्रशासनं पूर्णतया जगरुकः भूत्वा कार्यं करिष्यति।

**बाइट-2100 नायडु**

**गोवा-क्लब**

गोवा-आरक्षि बलेन ह्यः दिल्ली नगरात् , 'बर्च् बाय रोमियो लेन' नाइट्-क्लब् इत्यस्य चतुर्षु स्वामीषु एकम् अजयगुप्ता इत्यमुं निगडितम्। अवधेयं यत् शनिवासरे मध्यरात्रौ उत्तर-गोवाराज्यस्य विनाशकारी अग्निकाण्डे पञ्चविंशति जनाः मृताः। गोवा-आरक्षि बलस्य प्रवक्ता अवदत् यत् तस्मै गोवा-राज्यं प्रति आनेतुं औपचारिकतायाः समाप्तेः अनन्तरं सः शीघ्रमेव बन्धितः भविष्यति। प्रकरणेस्मिन् गृहीतः एषः षष्ठः जनः अस्ति।

**राष्ट्रिय-अन्वेषण**

राष्ट्रिय-अन्वेषण- अभिकरणेन एन्. आई. ए. इत्यनेन गतमासस्य दिल्ली-विस्फोट-प्रकरणे एकं अन्यं प्रमुखं अभियुक्तं निगडितम्। एन्. आई. ए. इत्यनेन उक्तं यत् जम्मू-कश्मीर्-राज्यस्य बारामुल्ला-नगरस्य डा. बिलाल् नसीर् मल्ला इत्येषः अस्मिन् प्रकरणे गृहीतः अष्टमः अभियुक्तः अस्ति।

**पुरुष-क्रिकेट्**

पुरुष-क्रिकेट्-क्रीडायां, ह्यः ओडिशा-राज्यस्य कटक्-नगरस्य बाराबती-क्रीडाङ्गणे पञ्चषु विंशति-प्रति-विंशति-शृङ्खलायाः प्रथमायां क्रीडायां भारतेन दक्षिण-आफ्रिकादलं एकाधिकैकशत धावनांकैः पराजितम्।

**।।इति वार्ताः।।**